**CLASS : 10th (Secondary)** **Code No. 136**

**Series : Sec/Annual-2023**

रोल नं०

# पूर्व मध्यमा सह माध्यमिक परीक्षा संस्कृत साहित्य (आर्ष पद्धति गुरुकुल)

**Sub. Code : 1001/SKS**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : 3 घण्टे ] [ पूर्णांक : 80*

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **7** तथा प्रश्न **9** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*

- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश - सर्वे प्रश्नाः समाधेयाः।*

**खण्डः 'क'**

**(बहुविकल्पीयाः प्रश्नाः)**

**1.** अधोविन्यस्तानामेकं समीचीनमुत्तरं विचित्य लिखत – 1 × 16 = 16

(i) यजुर्वेदः कस्य हृदि प्रकटीभूतः ?

(क) अग्नि-महर्षेः (ख) वायु-महर्षेः

(ग) आदित्य-महर्षेः (घ) अङ्गिरा-महर्षेः



https://www.haryanaboard.com

(ii) ''वर्हिर्षि'' पदस्य कोऽर्थः खलु ?

(क) मानसे (ख) कुशासने

(ग) वाह्यदेशे (घ) व्रह्माण्डे

(iii) ''नाभ्याऽआसीदन्तरिक्षम्'' इति मन्त्रे कः स्वरः ?

(क) षड्जः (ख) ऋषभः

(ग) गान्धारः (घ) मध्यमः

(iv) द्वात्रिंशाध्याये कियन्तो मन्त्राः ?

(क) द्वादश (ख) चतुर्दश

(ग) पञ्चदश (घ) षोडश

(v) ''दृष्ट्वा'' इति पदे कः प्रत्ययः ?

(क) त्वा (ख) ट्वा

(ग) क्त्वा (घ) वा

(vi) ''श्रेयः'' इति पदं कस्मिन् लिङ्गे ?

(क) पुंसि (ख) नपुंसके

(ग) स्त्रियाम् (घ) पुंसि क्लीवे च

(vii) ''गुडाकेशः'' इत्यनेन कः सम्वोध्यते ?

(क) सञ्जयः (ख) द्रोणः

(ग) अजुर्नः (घ) श्रीकृष्णः

(viii) वैदिकर्गातायाः तृतीयाध्यायस्य नाम किम् ?

(क) ज्ञान-योगः (ख) सन्न्यासयोगः

(ग) भक्तियोगः (घ) कर्मयोगः



https://www.haryanaboard.com

(ix) "हतो वा प्राप्स्यसि .......... जित्वा वा भोक्ष्यसे महीम्।" रिक्तस्थानं पूरयत।

(क) सुखम्
(ख) स्वर्गम्
(ग) यशः
(घ) दुःखम्

(x) मित्रसम्प्राप्तितन्त्रे नीतिसन्धिः कतिविधः ?

(क) त्रिधा
(ख) सप्तधा
(ग) चतुर्धा
(घ) पञ्चधा

(xi) "नातिदूरस्थः" इति पदं कस्मिन्नर्थे ?

(क) दूरस्थितः
(ख) अतिदूरस्थः
(ग) किञ्चिद् दूरस्थः
(घ) समीपस्थः

(xii) "विहङ्गमः" इत्यस्य पर्यायपदं किं नास्ति ?

(क) विहगः
(ख) विहंगः
(ग) विहायस्
(घ) खगः

(xiii) सन्न्यासग्रहणे कस्य योग्यता अपेक्षते ?

(क) ब्राह्मणस्य
(ख) वैश्यस्य
(ग) क्षत्रियस्य
(घ) सर्वेषामेव

(xiv) वानप्रस्थी कुत्र वसेत् ?

(क) आश्रमे
(ख) अरण्ये
(ग) गृहे
(घ) गुरुकुले



https://www.haryanaboard.com

(xv) "नमः" योगे का विभक्तिर्भवति ?

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

(xvi) "............ निकषा नदी।" रिक्तस्थानं पूरयत।

(क) ग्रामस्य (ख) ग्रामेण

(ग) ग्रामम् (घ) ग्रामे

**खण्डः 'ख'**

**(अतिलघूत्तरीय प्रश्नाः)**

**2.** अधस्तनानां गद्यभागानां हिन्दीभाषयार्थो विधीयताम् — 2 × 4 = 8

(क) तत्र च लघुपतनको नाम वायसः प्रतिवसति स्म। कदाचित् प्राणयात्रार्थं पुरमुद्दिश्य प्रचलितो यावत्पश्यति, तावज्जालहस्तोऽतिकृष्णतनुः, स्फुटितचरणः नरः संमुखो बभूव।

(ख) वायस आह – "पृष्टो मया तत्रैव, परमनेन अभिहितं यद् – बहु वक्तव्यमस्ति, तत्तत्रैव गत्वा कथयिष्यामि इति ममापि न निवेदितम्"।

(ग) मन्थरक आह – "भद्र ! भवति सुहृदयमसन्दिग्धं, यत् क्षुत्क्षामोऽपि शत्रुभूतं त्वां भक्ष्यस्थाने स्थितमेवं पृष्ठमारोप्य आनयति, न मार्गेऽपि भक्षयति"।

(घ) ततश्च वाष्पावसाने चित्राङ्गो लघुपतनकमाह – "भो मित्र ! सञ्जातोऽयं तावन्मम मृत्युः। तद्युक्तं सम्पन्नं यद्भवता सह मे दर्शनं सञ्जातम्"।

**3.** निम्नलिखितानां गद्यांशानां पद्यानां वा हिन्द्यामर्थं कुरुत - 2 × 3 = 6

(क) वयं राज्ञे कदापि न क्रुध्यामः द्रुह्यामः, ईर्ष्यामः, असूयामो वा अपितु तस्मै चिरकुशलं हितं सुखमायुष्यञ्च प्रार्थयेमहि।



https://www.haryanaboard.com

(ख) शोकरातिभयत्राणं प्रीतिविश्वासभाजनम्।

केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्।।

(ग) अथान्येद्युः मृगा एकत्र मिलित्वा अचिन्तयन् –

हा ! कष्टम्। भासुरकस्य भयात् आवासाद् बहिर्गन्तुं

न शक्नुमः, भोजनं विना म्रियेमहि।

4. अधोलिखितानां मन्त्रपूर्तिं विधेहि — 2 × 3 = 6

(क) सर्वे निमेषा ............. ।

(ख) परि द्यावापृथिवी ............. ।

(ग) यत्पुरुषं व्यदधुः ............. ।

खण्डः 'ग'

(लघूत्तरीय प्रश्नाः)

5. निम्नाङ्कितानां श्लोकानां सप्रसङ्गं व्याख्यां कुरुत — 4 × 3 = 12

(क) अपर्याप्तं तदस्माकं वलं भीष्माभिरक्षितम्।

पर्याप्तं त्विदमेतेषां वलं भीमाभिरक्षितम्।

(ख) अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।

विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हसि।।

(ग) सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।



https://www.haryanaboard.com

6. अधस्तनं प्रश्नद्वयमपि समाधीयताम् — 4 × 2 = 8

(क) पञ्चमे समुल्लासे सन्न्यासिनां के के धर्माः वर्णिताः संक्षेपेण लिखत ?

(ख) सन्न्यासग्रहणं ब्राह्मणानामेव धर्मः आहोस्वित् क्षत्रियादीनामपि।

खण्डः 'घ'

(निबन्धात्मक प्रश्नाः)

7. मन्त्र***द्वयस्य*** दयानन्दभाष्यानुसारेण सप्रसङ्गं व्याख्यां कुरुत — 6 × 2 = 12

(क) ततो विराडजायत विराजोऽधि पुरुषः।

स जातोऽअत्यरिच्यत पश्चाद् भूमिमथो पुरः।।

https://www.haryanaboard.com

अथवा

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।

योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।

(ख) ब्राह्मणोऽस्य मुखमासीद बाहू राजन्यः कृतः।

ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत।।

अथवा

यां मेधां देवगणाः पितरश्चोपासते।

तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा।।



https://www.haryanaboard.com

8. वैदिकगीतायाः द्वितीयस्य ***अथवा*** तृतीयस्य अध्यायस्य सारं लिखत। $6 \times 1 = 6$

9. पञ्चतन्त्रानुसारं "तिलचूर्णविक्रय" – कथायाः ***अथवा*** "वणिक्पुत्रं" – कथायाः सारं संक्षेपेण लिख्यताम्।

$6 \times 1 = 6$

https://www.haryanaboard.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से



https://www.haryanaboard.com